# संस्कृत वार्ता:

दिनाङ्क :- 17.06.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- जी-7 इत्यस्य नेतारः वैश्विकस्थिरतां, सुरक्षा-सहकारं, बहुराष्ट्रिय-सङ्घठित-अपराधस्य प्रतिकार-प्रयत्नाश्च केन्द्रीयमानाः घोषणानाम् श्रृङ्खलाः स्वीकृतवन्तः।
- फ्रान्स्-देशस्य एवियान्-नगरे जी-7 इति शिखरसम्मेलनेन समं प्रधानमन्त्री नरेन्द्रमोदी अमरीकादेशस्य राष्ट्रपतिना डोनाल्ड्-ट्रम्पेन सह मेलनं करिष्यति; सः फ्रान्स्-देशस्य भ्रमण-भागत्वेन अद्य सायङ्काले पैरिस्-नगरं प्राप्स्यति।
- रक्षामंत्री राजनाथसिंहः भारतस्य सार्वभौमता निर्विवाद्यमिति कथयन्, आतङ्कवादं विरुध्य सर्जिकल्-स्ट्राइक्स्, बालाकोट्, आपरेशन् सिन्दूर इत्येतानि च निर्णायकानि कार्याणि इति उदघोषयत्।
- भारतस्य रक्षोत्पादनं निवर्तमान-वित्तीयवर्षे दशांश-सप्त-अष्टोत्तरैक-लक्षं कोटिरूप्यकाणि अभिलेख्यं यावत् वर्धितम्; विंशति-एकविंशतिः वर्षात् दशाधिकैकशत- प्रतिशतं वर्धितमस्ति।
- विद्रोह-प्रतिरोध-कार्याणि अभिलक्ष्य रक्षाबलानि सम्पूर्णे मणिपुरे सजगाः सक्रियाश्च सन्ति; त्रयः आतंकवादिनः गृहीताः, षड्विंशतिश्च अवैध-अंतःभूमीयानि गुहा-स्थानानि नष्टानि।
- पुरुष-क्रिकेट्-क्रीडायां भारत-अफगानिस्तान-देशयोर्मध्ये त्रि-क्रीडा-श्रृङ्खलायाः द्वितीया एक-दिवसीया क्रीडा लखनऊ-नगरे प्रचलति।

---------------------------------------

<u>जी-7 शिखर-सम्मेलन</u>

जी 7 देशैः वैश्विक-स्थिरतायाः, सुरक्षा-सहयोगस्य अथ सीमापार-सङ्घटित-अपराध-निवारणस्य उद्देश्येन विभिन्नाः प्रमुखाः घोषणाः विहिताः। मुख्यवक्तव्ये नेतृभिः अमरीका-ईरान-

देशयोः मध्ये सञ्जातं संधिनिश्चयम् अभिनन्दितम्। सहैव होरमुज जलसंधौ सुरक्षित-समुद्रीय-परिवहनस्य महत्त्वं प्रतिपादितं, क्षेत्रीय-सुरक्षा-संवर्धनाय च समर्थनं प्रदत्तम्।

अन्य-घोषणापत्रे, जी-7 देशैः मादकद्रव्यस्य अवैधकार्यं निरोद्धुं सङ्कल्पो विहितः। अस्मिन् अभियाने ब्राजील-दक्षिणकोरिया देशौ अपि सहमतिं प्रदर्शितवन्तौ। अवैधमार्गान् रोद्धुं 'जी-7 प्लस पोर्ट्स नेटवर्क' इति नव-मञ्चस्य प्रस्तावः दत्तः।

*फ्रांस-देशस्य 'एवियन' नगरे चलायमाने जी-7 शिखरसम्मेलने प्रधानमन्त्री नरेन्द्रमोदी 'सर्वहितकारि-सतत-आर्थिक-विकासः' इत्याख्ये मुख्यविषये आयोजितायां महत्त्वपूर्णकार्यगोष्ठ्याम् भागं भजते। सत्रेऽस्मिन् जी-7 देशाः, सहभागी-राष्ट्राणि, अन्ताराष्ट्रिय-मुद्राकोषस्य ओ.ई.सी.डी. इत्यस्य च प्रतिनिधयः उपस्थिताः सन्ति। अत्रावधेयं यत् अद्य सायं प्रधानमन्त्रिणः नरेन्द्रमोदिन: अमरीका-राष्ट्रपतिना डोनल्ड-ट्रम्पेन सह बहुप्रतीक्षिता द्विपक्षीय-वार्ता भविष्यति। पंचविंशत्युत्तर-द्विसहस्रतमवर्षस्य फरवरीमासात् परं द्वयोः नेत्रोः इदं प्रथमं प्रत्यक्षतया सम्भाषणमस्ति । अमेरिका-ईरान-युद्धविरामस्य अथ होर्मुज-जलसंधेः पुनः उद्घाटनस्य पृष्ठभूमौ एषः संवादः अतीव महत्त्वपूर्णो वर्तते। उभौ नेतारौ द्विपक्षीय-व्यापार-संधिं समेत्य अतिरिक्तं वैश्विक-समाह्वानानां समाधानाय चर्चां करिष्यतः।

एतदतिरिच्य, प्रधानमन्त्री 'कृत्रिम-बुद्धिमत्तायाः सुरक्षित-प्रभावी-उपयोगः इति विषमधिकृत्य कार्य-मध्याह्नभोजे अपि भागं ग्रहीष्यति, यत्र प्रमुख-एआई-विपणीनां मुख्याधिकारिणः समुपस्थिताः भविष्यन्ति।

-------------------------------------

<u>प्रधानमन्त्री-पेरिस</u>

प्रधानमन्त्री नरेन्द्रमोदी फ्रांस-देश-प्रवासस्य भागत्वेन अद्य सायं पेरिस-नगरं प्रति एति। तत्रत्यः भारतीय-समुदायः तदीय-स्वागतार्थं महत् उत्साहेन सज्जो वर्तते। श्वः प्रातः प्रधानमन्त्री प्रमुख-विपणीनां मुख्यकार्यकारिभिः सह चर्चां करिष्यति, या मध्याह्नपर्यन्तं प्रचलिष्यति। तदनन्तरं, सः यूरोप-महाद्वीपस्य प्रमुख-प्रौद्योगिकि -मञ्चे 'विवा-टेक-शिखरसम्मेलने' भागं ग्रहीष्यति, तत्र

च स्व-सम्बोधनं प्रदास्यति। सायं काले असौ एकस्मिन् सामुदायिक-कार्यक्रमे भारतीय-प्रवासिभिः सह संवादं विधास्यति।

-------------------------------------

## राजनाथ-भारतस्य सुरक्षा

रक्षामंत्री राजनाथसिंहः अवदत् यत् भयोत्पादनं विरुध्य शून्य-सहिष्णुतायाः नीतिमनुसृत्य सर्जिकल्-स्ट्राइक्स्, बालाकोट्, आपरेशन् सिन्दूर् इत्यादीनि निर्णायक-कार्याणि यावत्, भारतदेशः स्पष्टम् सन्देशम् प्रेषितवान् यत् तस्य सम्प्रभुता निर्विवाद्या अस्तीति। सामाजिक-प्रसार-माध्यमे श्रीसिङ्हः उल्लिखतवान् यत्, प्रधानमन्त्रिणः नरेन्द्रमोदिनः योग्य-नेतृत्वे भारते राष्ट्रिय-सुरक्षा-संरचनायां ऐतिहासिक-परिवर्तनम् अभवदिति। सः इत्यपि अवदत् यत् रक्षाक्षेत्रे आत्मनिर्भरतायाः विषये देशस्य संकल्पेन स्वदेशीय-क्षमता सुदृढा, सशस्त्र-बलानां आधुनिकीकरणं, भूमि-समुद्र-वायु-साइबर-अन्तरिक्ष-क्षेत्रेषु सज्जता च वर्धिता। रक्षामंत्री अधोरेखितवान् यत् गत द्वादश-वर्षाणां यात्रा दृढतरां, सुरक्षितां, आत्मनिर्भरां, आधिक्येन आत्मविश्वासयुताञ्च भारतमातरं प्रतिबिम्बयतीति।

-------------------------------------

## राजनाथ-रक्षा उत्पादनम्

रक्षामंत्री राजनाथसिंहः अस्मिन् आर्थिकवर्षे भारतस्य वार्षिक-रक्षा-उत्पादनं सार्वकालिकं दशांश-सप्त-अष्टोत्तरैक-लक्षं कोटिरूप्यकाणि यावत् औन्नत्यं प्राप्नोदिति अवोचत्। सामाजिक-प्रसार-माध्यमे, श्रीसिङ्हः अकथयत् यत् एषा उल्लेखनीया उपलब्धिः पूर्वतनस्य वित्तीयवर्षस्य दशांश-पञ्च-चतुरुत्तरैक-लक्ष-कोटिरूप्यकाणां उत्पादनस्य अपेक्षया दशांशषडुत्तर-पञ्चदश-प्रतिशतं यावत् प्रभावोत्पादिका वृद्धिः, विंशति-एकविंशतिः वित्तीय-वर्षाच्च दशाधिकैकशत-प्रतिशतात्मिका अस्ति।

-------------------------------------

**<u>मणिपुर: - उग्रवादी</u>**

मणिपुरे सुरक्षाबलैः उग्रवाद-विरोधाभियानानि तीव्रीकृत्य त्रयः उग्रवादिनः निगडिताः सहैव षड्विंशति अवैध-भूमीयानि गुहास्थानानि विनष्टानि। आरक्षिबलानुगुणं, निगृहीताः उग्रवादिनः प्रतिबन्धित-सङ्घटनस्य 'पीपल्स लिबरेशन आर्मी' – पी.एल.ए. इत्यस्य सक्रिय-सदस्याः सन्ति, ये पश्चिम-इम्फाल-मण्डलात् गृहीताः। एते अनेकेषु हिंसाचार-अपराधेषु संलिप्ताः आसन्। अपरपक्षे, कामजोङ्ग-उख्रुल-मण्डलयोः सशस्त्र-समूहैः उपयुज्यमानाः षड्विंशतिः अवैध-गुहास्थानानि ध्वस्तीकृतानि ।

---------------------------------------

**<u>क्रिकेट-भारत - अफगानिस्तान</u>**

क्रिकेट्-क्रीडायां, लखनऊ-नगरे स्पर्धात्रयाणां श्रृङ्खलायाः द्वितीयायां, एकदिवसीय-अन्ताराष्ट्रिय-क्रिकेट-क्रीडायां, अफगानिस्तान-देशं विरुध्य एक-शून्येन अग्रस्थं भारतं त्रि-अधिक-चतुश्शत-धावनाङ्कानां लक्ष्यं अददात्। यत्र दलनायकेन शुभमनगिलेन सार्धैकशताधिकानि, ईशानकिशनेन च सपादशतधावनाङ्कानि रचितानि। इतः पूर्वं अफगानिस्तान्-देशः पणकं विजित्य प्रथमतया क्षेत्ररक्षणम् अचिनोत्।

।। इति वार्ता: ।।